नं० ४४२८ – ध

गायत्रीहृदयम्

पत्राणि ११ (एकादशानि)

गायत्रीहृदयम् (पूर्ण)

पत्राणि ११

नं० ४४२८-घ

गायत्रीहृदयम्

पत्राणि ११ (एकादशानि)

उपनि बतह०

पद्धति बस्ता २

॥ श्रीगणेशाय नमः ॥ हरिः ॐ ॥ नमस्कृत्य भगवा
न्याज्ञवल्क्यः ॥ स्वयंभुवं परिपृच्छति ॥ त्वं ब्रूहि
ब्रह्मन्नु ॥ गायत्र्या उत्पत्तिं श्रोतुमिच्छामि ॥ ब्रह्मज्ञा
नोत्पत्तिं परिपृच्छामि ॥ ब्रह्मोवाच ॥ प्रणवेन व्या
हृतयः प्रवर्त्तते ॥ नमस्कृत्य परं ज्योतिः ॥ कः पुरु
षः ॥ स्वयंभूर्विष्णुरिति ॥ सोहं तावत्स्वयं गुह्या
मंथयते ॥ मथ्यमानात्फेनो भवति ॥ फेनाद्बु २

बुद्बुदो भवति। बुद्बुदाद्धंडं भवति। अंडाद्दामा भवति। आत्मनो आकाशो भवति। आकाशाद्वायुर्भवति। वायोरग्निर्भवति। अग्नेरोंकारो भवति। ओंकाराद्व्याहृती भवति। व्याहृत्या गायत्री भवति। गायत्र्या सावित्री भवति। सावित्र्या सरस्वती भवति। सरस्वत्या वेदा भवंति। वेदेभ्यो ब्रह्मा भवति। ब्रह्मणो लोका भवंति। तस्माल्लोकाः प्रवर्तंते ॥

चत्वारो वेदाः सांगाः सोपनिषदः सेतिहासाः सर्वे
गायत्र्याः प्रवर्त्तंति ॥ यथाग्निर्देवानां ब्राह्मणो मनु
ष्याणां मेरुः शिखरिणां गंगा नदीनां वसंतो ऋतूनां
ब्रह्माः प्रजापतीनामेवासौ ॥ मुख्या गायत्र्या ॥
गायत्री छंदो भवती ॥ किं भूः ॥ किं भुवः ॥ किं स्वः ॥ किं
[illegible]ः ॥ किं महः ॥ किं जनः ॥ किं तपः ॥ किं सत्यं ॥ किं तत् ॥ किं २
सवितुः ॥ किं वरेण्यं ॥ किं भर्गः ॥ किं देवस्य ॥ किं धीम

हि॥ किंधियः॥ किंयः॥ किंनः॥ किंप्रचोदयात्॥ भूरि
ति भूर्ल्लोकोः॥ भुवः इसंत रिक्षलोकः॥ स्वच रितिर
स्वर्गलोको॥ मह इ तिमहर्ल्लोको॥ जन इ तिजनलोक
॥ स्तप इ तितपोलोकः॥ सत्यश्मि तिसत्यलोको॥
भूर्भुवःस्वरोमितित्रैलोक्यं॥ तदि तितदसो॥ तेजो
यतेजसो ऽग्निर्देवता॥ सस्तुव रि तिसा विजो ऽन्नं॥ वेव
रेण्यं॥ अचन मिव प्रजापतिः॥ भर्गइत्यापोवैन

गः।यस्य परस्त्व सर्वा देवताः।देवस्य यदिंद्रो वै देवः॥

यद्दिवं तदिंद्रः।तस्मात्सर्वे गुरुषो नाम।विष्णोधर्म

महीत्यध्यात्मं।[illegible] स प्राणो ध्येय इत्यंतरात्मं।किम

मध्यात्मं।तत्परमं पदं।योनइति पृथिवी वै यानः॥

प्रचोदयादिति कामइ मां लोकान्प्रच्यावयते॥या

त्वशाःसो या त्वशःसः।तोघ्यास्तत्परो धर्म इत्येषा

गायत्री।किंगोत्रा।कस्य हरा।कतिपादा।कतिकु २

त्री। कतिशीर्षा। सांख्यायनसगोत्री। केस्याः स्त्रयः पा
दा नवंति। कास्यास्त्रयः। कानि पंचशीर्षाणि न
वंति। ऋग्वेदोस्याः प्रथमः पादो नवति। यजुर्वेदो
द्वितीयः। सामवेदस्तृतीयः। पूर्वादिकु प्रथमा कु
क्षिर्नवति। दक्षिणा द्वितीया। पश्चिमा तृतीया। उत्तरा।
चतुर्थ्यूर्ध्वा पंचमध्रवा षष्ठी। व्याकरणमस्याः
प्रथमं शीर्षा नवति। शिक्षा द्वितीयं। कल्पस्तृतीयं। नि

रक्तं चतुर्थी ज्योतिषामयनमिति पंचमं। किं ब्रह्मणं किं चेष्टितं। किमुदाहृतं। किमक्षरदैवतं ब्रह्मणमीमांसा। अथर्वणवेदो विचेष्टितं। छंदो विजिदिरिक्त दाहृतं। को वर्णः। कः स्वरः। श्वेतो वर्णः। षट्स्वराणीमांसो न्यक्षरदैवतानि नवं तिष्ठवानिवक्त्रगायत्री। मध्यमा नवक्त्रसावित्री। पश्चिमसंध्यासरस्वती॥ प्रातःसंध्या 4
रक्तपद्मासनस्थारक्तांबरधरारक्तवर्णारक्तगंधार

क्तमाल्यानुलेपना। चतुर्मुखी। चतुर्भुजा। द्विने
त्रा। दंडाक्षमाला। स्रुक्कमंडलुस्रुक्स्रुक्स्रुवधा
रिणी। सर्वाभरणभूषिता। गायत्री। कौमारी।
ब्राह्मी। हंसवाहिनी। ऋग्वेदसंहिता। ब्रह्मदैवत्या।
त्रिपदा गायत्री। षट्कुक्षिः। पंचशीर्षा। ऽग्निर्मु
खा। रुद्रशिखा। विष्णुहृदया। ब्रह्मकवचा।।
साँख्यायनसगोत्री। भूर्लोकव्यापिनी। अग्नि

5

स्तत्वमुदात्तस्वरमकारः॥ऋक्वर्णकर्मजा

ने विनियोगः॥सेषागायत्री॥मध्याह्नसं ध्या

॥श्वेतपद्मासनस्था॥श्वेतांबरधरा॥श्वेतवर्णा

श्वेतगंधा॥श्वेतमाल्यानुलेपना॥पंचमुखी॥

दशभुजा॥त्रिनेत्रा॥त्रिशूलाक्षमाला॥कंमंड

लुकपालधारिणी॥सर्वाभरणभूषिता॥सावि

त्री॥योवनी॥माहेश्वरी॥वृषभवाहिनी॥यजुर्वेदस ५

हिता। रुद्रदैवत्या। त्रिपदा। सावित्री। षट्कुक्षिः पं
चाशीर्षा अग्निमुखा। रुद्रशिखा। विष्णुहृदया।
ब्रह्मकवचा। सांख्यायनगोत्री। भुवर्लोकव्यापिनी
। वायुस्तत्वमन्त्रदात्रस्वरमुकारः स्वरैतेवर्णैश्चैतत्रा। सं
मज्ञाने विनियोग इत्येषा सावित्री॥ सायंसंध्यास्त्र
ष्टप्नासनस्था। लक्षांवरा लक्षवर्णा लक्षगंधा।
लक्षमाल्यानुलेप[illegible]ना॥ एकमुखी। चतुर्भुजा।

द्विनेत्रा। चक्राक्षमाला। करुं मंकुस्तुशंखचक्रगदापद्मधारिणी। सर्वाभरणभूषिता। सरस्वती। वृद्धा
वैष्णवी। गरुडवाहिनी। सामवेदसहिता। विष्णुदेवत्या। त्रिपदा सरस्वती। षट्कुक्षिः। पंचशीर्षा
ग्निमुखा। रुद्रशिखा। विष्णुहृदया। ब्रह्मकवचा।
सांख्यायनसगोत्री। स्वर्लोकव्यापिनी। सूर्यसावित्री। 5
स्वरितस्वरमकारः। सत्त्वगुणी। मोक्षज्ञाने विनि

योग इत्येषा सरस्वती॥ रक्ता गायत्री॥ श्वेता सावि
त्री॥ सप्तवर्णा सरस्वती॥ प्रणवे नित्ययुक्तस्य व्या
हृतेषु च सप्तसु॥ सर्वेषामेव पापानां शंकरे समुप
स्थिते॥ दशशतसहस्रमभ्यर्च्य गायत्रीं पावनं मह
त्॥ प्रईक्कादो त्रिर्वसिष्ठश्च शुकः कण्वः पराशरः॥
विश्वामित्रो महातेजाः कपिलः शौनको महान्॥ या
ज्ञवल्क्यो भरद्वाजो जमदग्निस्तपोनिधिः॥ गौतमो॥

मुनिः श्रेष्ठो वेदव्यासाश्च रोमशः ॥ अगस्त्यः कौ
शिको वसः शुनस्सोमं कण्वस्तथा । दूर्वासास्तप
सां श्रेष्ठो नारदः काश्यपस्तथा । उक्ताल्पकास्त
थ मध्यप्रतिष्ठान्यासस्त्रिविंशका । गायत्र्युष्णिगनु
ष्टुप् बृहती पंक्तिरेव च । त्रिष्टुप् जगती चैव तथाऽति
जगती मता । शक्करी सा । तिपूर्वा स्यादष्ट्यत्यष्टि त ७
था स्मृतिः । धृति श्चाधृतिश्चैव सतिः प्रकृतिरास्त

तिः। विसृतिः संसृतिश्चैव तथा निसृतिरुत्सृतिः॥
इत्येताश्छंदसां संज्ञाः क्रमशो वच्मि सांप्रतं॥ नृरि
तिश्छंदो भुव इतिश्छंदः स्व इतिश्छंदो नृभुवः सुवरिति
छंदो दैवी गायत्री छंद इत्येता निश्छंदाः ऽसि॥ प्रथममैर
माहेयं। द्वितीयं प्राजापत्यं। तृतीयं ऽसौम्यं। चतुर्थमीशा
नं। पंचमं सावित्रदैवत्यं। षष्ठं बार्हस्पत्यं। सप्तमं पित्र्यदै

वत्सं । मष्टमं नगरदैवत्यं । नवममर्यम्णं । दशमं सावि

त्रं । एकादशं त्वाष्ट्रं । द्वादशं पौष्णं । त्रयोदशमैन्द्राग्नं । च

४ तुर्दशं वायव्यं । पंचदशं वामदेव्यं । षोडशं मैत्रावरुणं ॥

सप्तदशं ब्राह्ममष्टादशं वैश्वदेवं । एकोनविंशं वैर

ष्णवं । विंशं वासवं । मे(ए)कविंशमैन्द्रं ॥ द्वाविंशं कौ

बेरं । त्रयोविंशमाश्विनं । चतुर्विंशमाग्नेयं ॥ ब्रा ८

स्यं ॥ द्यौर्मूर्द्ध्नि संघाते । ब्रह्मा विष्णुर्ललाटे रुद्रः ॥ भ्रु
वोर्मध्य चक्षुषोश्चंद्रादित्यौ ॥ कर्णयोः शुक्रबृहस्प
ती ॥ नासिके वायुदेवत्यौ । दंतोष्ठाउन संधिर्मुखम
ग्नि जिह्वा सरस्वती । ग्रीवास्तु साध्यानु बाहू ॥ स्त
नयोर्वसवः ॥ बाह्वोर्मरुतः ॥ हृदयं पर्जन्यमाका
शमुदरं नाभिरंतरिक्षं ॥ कटिरिंद्राग्नी जघने

प्राजापत्यमेढ्रमासमन्तयाबुरू विश्वेदेवाजानुः सं
ज्ञा कैकै वोऽङ्कशिवयो ॥ जंघयोरनैर्यद्वयोः
खुरा ॥ रः पितरः पादौ पृथ्वीवनस्पतयो रं गुल्या
निरोमाणि नखानि मुहूर्त्तास्त्वयविग्रहाः ॥ केतु
मांसास्त्रवः संध्याकालत्रयमाच्छादनं ॥ संवत्स
निमिषमहोरात्रमादित्यश्चंद्रमाः ॥ सहस्त्रपरमां ८

देवीं दशमध्यां शतावरां ॥ सहस्रनेत्रीं देवीं गायत्रीं

शरणमहं प्रपद्ये ॥ ॐ तत्सवितुर्वरदायनमः ॥ ॐ

ततुर्ब्रह्म(?) वर्जपायनमः ॥ ॐ तस्यान्तरादिसोपविष्टाय

नमः ॥ ॐ तस्यान्तरधीयानो रात्रिकृतं पापं नाशय

ति ॥ सायमधीयानो दिवसकृतं पापं नाशयति ॥

सायं प्रातः प्रयुंजानो पापो ऽपापो भवति ॥ य इदं गा

यत्रीहृदयं ब्राह्मणः प्रयतः पठेत् ॥ चत्वारो वेदास्तस्य

धीता भवंति॥ सर्वेषु तीर्थेषु स्नातो भवति॥ सर्वैर्दे
ज्ञातो भवति॥ अनन्नहरणात्पूतो भवति॥
अभोज्यभोजनात्पूतो भवति॥ अचोष्यचोष
णात्पूतो भवति॥ अपेयपानात्पूतो भवति॥
अगम्यगमनात्पूतो भवति॥ गुरुतल्पगमना
त्पूतो भवति॥ सुरापानात्पूतो भवति॥ स्वर्ण
स्तेयात्पूतो भवति॥ पतितसंभाषणात्पूतो भ २०

वति॥ अब्रह्मचारी सुब्रह्मचारी भवति॥ अने
न गायत्रीहृदयेनाधीतेन॥ क्रतुशतेनेष्टं भव
ति॥ षष्टिगायत्र्याः शतसहस्राणि जप्तानि
फलानि भवंति॥ अष्टौ ब्राह्मणानु सम्यग्ग्राहये
त्॥ अथ सिद्धिर्भवति॥ इदं नित्यमधीयानो ब्रा
ह्मणः प्रयतः शुचिः॥ सर्वपापैः प्रमुच्यते ब्रह्म

लोकेमहीयते॥ ब्रह्मलोकेमहीयत इति॥ इत्या-
हभगवान्ब्रह्मा:॥ इति श्रीगायत्रीहृदयंस्तोत्रं
संपूर्णं॥ संवत्१८३२ नावर्षे कार्त्तिकवदी ७ सोमे
लिखितं चा ईश्वरस्त्री हरस्त्रीयेन॥ ॥ ॥
॥ श्री॥ ॥ रस्तु॥ ॥ ॥ ॥ ॥